स्तद्रूपं वासनाद्वैविध्यमाह वासनेति ११ तत्र मलिनां लक्षयति अज्ञानेति वासनाजीवानां प्ररोहे अज्ञानं सुक्षेत्रं तस्मिन्सु
घनाकार विषयानुसंधानाभ्यासो पचिता कारा वासनावीजं रागद्वेषादि रूपांचितत्वात् घनेन निबिडेन अहंकार उपसेचकः क्षेत्रकर्ष
नहिं सा वध्यमाना संतन्यमाना च शालते प्रोभते १२ अङ्कुरं लक्षयति यथा बीजानतः सन्नाम्रांकुराः संत एव कालजालादि लव
धाद्राविर्भवंति तथा वासनान्तर्भाविजन्मपरंपराः सत्य एव कालकर्मादिवलितं यथा प्रादुर्भवंति अत्यंतासतो जन्मायोगा त्तत्रत्व

अनया वासनया देहो ध्रियते भूतपंजरः तन्तुनान्तर्निविष्टेन मुक्तौघस्तन्तुना यथा २० वासना द्विविधा प्रोक्ता शुद्धा च मलिना
तथा मलिना जन्मनो हेतुः शुद्धा जन्मविनाशिनी २१ अज्ञानसुघनाकारा घनाहंकारशालिनी पुनर्जन्मकरी प्रोक्ता मलि
लिना वासना बुधैः २२ पुनर्जन्माङ्कुरं त्यक्त्वा स्थिता संभृष्टबीजवत् देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चोच्यते २३ अपुन
र्जन्मकरणी जीवन्मुक्तेषु देहिषु वासना विद्यते शुद्धा देहे चक्र इव भ्रमः २४ ये शुद्धवासना भूयो न जन्मानर्थभाजनं ज्ञा
तज्ञेयास्त उच्यन्ते जीवन्मुक्ता महाधियः २५ जीवन्मुक्तिपदं प्राप्तो यथा रामो महामतिः तत्तेऽहं शृणु वक्ष्यामि जरामरणशान्तये
२६ भारद्वाज महाबुद्धे रामक्रममिमं शुभं शृणु वक्ष्यामि तेनैव सर्वं ज्ञास्यसि सर्वदा २७ ॥०॥ ०॥०॥०॥०॥०॥०॥

ज्ञानेनाविद्यास्वरूपदाहे तांतर्गतजन्मांकुरनाशोपि स्वयमर्थ सिद्धेन भवति वह्नौ भृष्टजीवदेहधारणमात्रप्रयोजना वासना सनाशिष्यते साशुद्धे
त्यर्थः २३ उक्तमेवार्थं स्फुटयति अपुनरिति देहे स्थिति देहधारणकार्यं तं ज्ञानेप्ययि वासनासद्भावो अनुमीयते इति भावः २४ फलेन सहप्र
स्तुतां जीवन्मुक्तिमाश्रये नलक्षयति य इति तयाच तत्त्वज्ञानसुष्ठु जन्मांकुरत्यागेन कृत्वा शुद्धवासनामात्र धृतशरीरत्वं जीवन्मुक्तत्वं लक्षणफ
लितं २५ तत्साधनानि क्रमेण प्रतिजानीते जीवन्मुक्तिति तथाविधं जीवन्मुक्तिपदं रामो यथा येन साधनक्रमेण प्राप्तस्तदुक्ष्यामि जराम
रणोपलक्षित सर्वानर्थनिवृत्तिलक्षणफलमित्यर्थः २६ उक्तार्थमेव स्फुटयत्फलान्तरमाह भरद्वाजेति एकविज्ञानेन सर्वविज्ञानमपि फल

यो॰ उ॰ ४

वा॰टी॰ तत्रतत्रसन्निहितैरमरादिभिर्मानितःपूजितोरघुनंदनः अखिलांजंबूद्वीपात्मिकांमहींसम्यगवलोक्यस्वगृहमेयोध्यामुपययावि
वै॰प्र॰ तिसंबंधः ईश्वरःशिवः ४२ ॥इतिश्रीरामकृता॰शैवेतीर्थयात्राप्रकारोनामतृतीयःसर्गः॥३॥ तीर्थयात्रागतस्यारामसुहृदानंदनं गृहे राम
॥२३॥ स्यावेष्टचर्यादिव्यवहारमवर्णयन्नेराम इति मौलेःसमूहैः मंगलाचारार्थं विकीर्णैःविरूपत्रिविरूपनामैकदेशेनामयहेण
१ प्रथमागतःप्रथमंप्रवासादागतः २ सहःआलिंगितस्तेषुसमुचितमभिवादप्रियाभिलापाद्याचरणंयस्यसतथोक्तः नमोमो
स्वदेहइतिशेषःहर्षोत्कुल्लत्वमितिभावः तस्मिन्दशरथगृहे दशरथेरामस्यप्रियप्रकथनैःप्रियवाक्यैः आनंदिताःजनाः

अमरकिन्नरमानवमानितःसमवलोक्यमहीमखिलामिमां उपययौस्वगृहंरघुनंदनोविहृतदिक्शिवलोकमिमेश्वरः ४
२॥इतिश्रीमहारामायणेतीर्थयात्राकरणंनामतृतीयःसर्गः॥३॥श्रीवाल्मीकिरुवाच॥ रामःपुष्पांजलिव्रातैर्विकीर्णःपुरवा
सिभिः प्रविवेशगृहंश्रीमान्जयंतोविरूपतथा १ आस्यनामाथपितरं वसिष्ठंभ्रातृबांधवान् ब्राह्मणान्कुलवृद्धांश्च
घवःप्रथमागतः २ सुहृद्भिर्भ्रातृभिश्चैवपित्राद्विजगणेनच मुहुरालिंगितांगोराघवोनममोमुदा ३ तस्मिन्गृहेदशर
थेःप्रियप्रकथनैर्मिथः जघूरगुर्मधुरैराथामृदुवंशस्वनैरिव ४ वभूवाथदिनान्यष्टौरामागमनउत्सवः सुखमज्ज
नोन्मुक्तकलकोलाहलाकुलैः ५ उवाससमुखंगेहेततःप्रभृतिराघवः वर्णयन्विविधाकारान्देशाचारानितस्ततः
६ प्रातरुत्थायरामोसौकृत्वासंध्यांयथाविधि सभासंस्थंददर्शेदसमंस्वपितरंतथा ७ श्रीरामचंद्रायनमः॥॥

२३

३ तैःमिथःअन्योन्यंद्विशोनुपूर्वमस्तुर्दिशोदिशिभ्रांतवंतः हर्षकृतव्यामोहादिभ्रमंप्राप्तुरितिवार्थः दृष्टांतेप्येवं अथवादिक्शब्देन
तत्रस्थाजनालक्ष्यतेदशरथःप्रियकथाभिरुपलक्षितामिथः समवतउत्सवविशेषेमृदुवंशस्वनैः क्रीडितइववभ्रमुरित्यर्थः ४ मत्ते
हृष्टैर्जनैरत्युत्कृष्टतयामुक्तःकलागंभीरायःकोलाहलःतेनआकुलःआप्तः ५ इतस्ततोदृष्टान्देशाचारानितस्ततोवर्णयन्नितिवा राम॰
सुखमुवासेन्वयः ६ प्रातरित्यादिवीप्साभिप्रायेणतथेतिपूर्वश्लोकोक्तसमुच्चयार्थः ७ श्रीरामचंद्रायनमः॥०॥०॥० २३

२६ २७ भंगोप्युभंगुरैर्भ्रमरसमूहसंकुलैः अर्थात्कुसुमैश्चितिगम्यते २८ अपनोदितैः प्रेरितैः ३० आवर्ज्य पुनर्दानमानादिनावशीकुर्वन्
जंगलान्यिव जांगलान्नीर्णरण्यानि ३१ ददर्शत्यस्य पावनान्यंभांसि मानित्यंते सर्वत्र संबंधः आयतानि दिर्घमुत्यायतनानि जनातिसुल
लणयाजनपदांतेषु ३२ वेणी केवलां कृष्णवेणीं कृष्णयासंभिन्नाम् ३४ श्रीगिरिं श्रीशैलं ३५ कृत्स्न प्राप्य सरः वडवावदनं हयग्रीव

वशिष्ठ प्रमुखैर्विप्रैः शास्त्रज्ञैश्च समन्वितः स्निग्धैः कनिष्ठैरेव राजपुत्रवरैः सह २६ अंबाभिर्विहिताशीर्भिरालिंग्यालिंग्य
भूषितः निरगात्स्वगृहाद्रम्यात्तीर्थयात्रार्थमुद्यतः २७ निर्गतः स्वपुरात्यौरैस्तूर्यघोषेण वादितः पीयमानः पुरस्त्रीणां नेत्रैः
र्भंगोप्युभंगुरैः २८ यामीणललनालोल[illegible]लहस्तापनोदितैः लाजवर्षैर्विकीर्णो माहिमैरिव चलैर्माहि २९
आवर्जयन्निप्रगणान्दानैरव्रजाशिषः आलोकयन्दिगंतांश्च परितश्चामजोगमान् ३० आयारभ्य स्वकान्समा
क्रमात्कोशलमंडलात् स्नानदानं तपोध्यानपूर्वकं संददर्शह ३१ नदीतीर्थानि पुण्यानि वनान्यायतनानि च जंगलानिज
नांतेषु लग्नानिक्षिप्रमहीभृताम् ३२ मंदाकिनी सिंधुनिभा कालिंदी चोत्पलामला सरस्वती शतद्रुश्च चंद्रभागा मिरावती ३३
वेणीश्च कृष्णवेणी च निर्विंध्या सरयूस्तथा चर्मण्वती वितस्ता च विपाशा बाहुदापि च ३४ प्रयागं नैमिषं चैव धर्मारण्यं ग
यां तथा वाराणसीं श्रीगिरिं च केदारं पुष्करं तथा ३५ मानसं च कृत्स्नसरस्तथैवात्र रमानसं वडवावदनं चैव तीर्थं हंस
सादरं ३६ अग्नितीर्थं महातीर्थं इंद्रद्युम्नसरस्तथा सरांसि सरितश्चैव तथानंदह्रदावली ३७ स्वामिनं कार्तिके
यं च पुष्पालग्राममहरिं तथा स्थानानि च चतुः बहिर्हरस्थहरस्यच ३८ नानाश्चर्यविचित्राणि चत्वराध्वनयनि च विं
ध्यमंदरकुंजांश्च कुलशैलस्थलानि च ३९ राजधीराणां च महतां ब्रह्मर्षीणां तथैव च देवानां ब्राह्मणानां च पावनाना
मानाश्रमान् ४० भ्रमन्नयं सर्वभूभागमास्सहमानदः चतुर्दिग्गतेषु सर्वानेव महीतटान् ४१ ॥
तीर्थं ३६ महातीर्थमिंद्रद्युम्नसरोवरविशेषणं ३७ ३८ कुंजान्लतागृहान्कुलशैलान्हिमवदाद्यः ३९ चकारेणानुक्ततत्तत्स्था
नसमुच्चयार्थः ४० सर्वं भूभागमपि पर्यटंतासन्निहितानां कान्तुकानाम्नि हि मातिधाय प्रकटनाय चाभ्यागमनं च ४१ ॥ राम ॥

ना॰ टी॰ भरत इति इत एव पूर्वं रामायणमनुसृत्य यतिविना शत्रुघ्नं भरतस्य मातामह गृहगमनं विवाहागमनं च कल्प्यते तेनात्मित्यनेन पूर्वमपि
वै॰ प॰ वाड्वारं तत्र भरतगमनमनवस्थाने वासीदिति गम्यते जननी वधूर्वहतीति जन्या स्नात्रत्रायलंकारादिभिरीति जन्यत्रा विवाहसंदर्भे २
॥१४॥ काम्यीदीनि निर्वेदचिंतादुःखलिंगानि वर्ण्यंते ४ विशालान्तत्र विशिष्टस्यामानाय सालिमालमिति ५ अत्याप्तारो निश्चेष्टः ६ लि
यिकर्मार्थितः उपमायस्य ७ अनिहिकं अहन्यवश्यकर्तव्यं ८ गुणगण्याकरं तं एवं पूर्वोक्तचिंतादिभिर्युक्ते वशिष्ठं आलोकेन

24

जन्यत्रार्थं च पुत्रान्तं प्रत्यहं मंत्रिभिः सह कृतमंत्रे महाप्राज्ञे यज्ञे दशरथे नृप २ कृतायां तीर्थयात्रायां रामो निजगृहे स्थि
तः जगामानुदिनं कार्श्यं शरदीवामलो धरः ४ कुमारस्य विशालाक्षः पाण्डुतां मुखमादधे पाकयुक्तदलं फुल्लं सालिमाले नि
वींभुजे ५ कपोलतलसंलीनपाणिः पद्मासनः स्थितः चिंतापरवशो नित्यं निर्व्यापारो बभूव ह ६ कदाचिच्छ्रितया युक्तः ख
दीपरदुर्मना नोवाच कस्यचित्किंचिदपि कर्मार्थितो यमः ७ खेदयुक्तः परिजनैर्नानाश्री प्रार्थ्यमानैः पुनः पुनः चकाराह्निकमा
चारं परिम्लानमुखांबुजः ८ एवंगुणविशिष्टं तं रामं गुरुगणाकरं आलोक्य भ्रातरावस्य तानेवाययतुर्द्रुतं ९ तथा
नेषु नवनेत्रेषु खेदवत्सु कपोलेषु च सपत्नीको महीपालश्चिंताविव शांताययौ १० काते पुत्र घनाचित्ते त्यवं राम पुनः पुनः
अपत्र ... नवा कथयद्ध्यसः ११ न किंचिन्नातमे दुःखमित्युक्त्वा पितरं कराः रामो राजीवपत्राक्षस्तूष्णीमे
वस्तितिष्ठति १२ ततो दशरथो राजा रामः किं खेदवानिति अपृच्छत्सर्वकार्यज्ञं वशिष्ठं वदतां वरं १३ अस्य तत्कारणं श्री
मन्मा राजन्दुःखमस्तु ते इत्युक्त्वा चिंतयित्वा स वशिष्ठमुनिनान्नृपः १४ ” ” ” ” ” ” ” ” ” ” ” ” ” ”

न्वयः ९ १० नाकथयदेव कथन प्रयोजनासिद्धि निश्चयादितिभावः ११ दुःखं त्वया परिहर्तुं शक्यमित्याशय इति नानेत वादितो तिष्ठ
त्रिस्मत स्थो स्मयोगाद्विषयेल्लट् १२ किंनिमित्तमिति प्रश्नः प्रतिवचनेन वशिष्ठमुनिना सन्नयति एवं प्रकारेणोक्तः तदेवाह अस्य ४६
त्रेत्यादि नवधेनोत्तरश्लोकमहितेन रामचिंतायाः समोदर्केत्वसूचनाय श्रीमन्निति संबोधनम् १५ श्रीरामचंद्राय नमः ॥१०॥ ॥ ॥१४॥

सरामः वशिष्ठादिभिः सहस्थित्वा अनुरूपाभिः कथाभिरादृतः सन् दिनचतुर्भागं अत्यंततसं योगेद्वितीयादिनस्य चतुर्भागे इत्यर्थः आखे
टकेन चावनजंगमेषु नैरण्यान्वय: आखेटकं मृगया ९ २० मृगयादीनामनित्यत्वे घातनाय प्रोयेति भोः तस्मात् लक्ष्मण शत्रु प्राप्
२१ हे अनघे इति संज्ञा भरद्वाजस्य वा संबोधनं सरामः नृपतीनां राज्ञां समुचितेन व्यवहारेण मनोहरया सुजनानां चेतसि चंद्रिका
वदाल्हादिकया अत एव स्वस्तुताप्रशस्ता सुधारसवत्यपालनाचतुराचया तत्याविधयेति स्तुतेति आपाद्य संहिताख्य सुधांतदृष्टसेन

कथाभिः सुविचित्राभिः स वशिष्ठादिभिः सह स्थित्वा दिनचतुर्भागं ज्ञानगर्भाभिरादृतः ८ जगामपित्रा च ज्ञातो महत्या वै०
सेनयावृतः वराहमहिषाकीर्णं वनमाखेटके रुया ९ ततआगत्य सदने कृत्वा स्नानादिकं क्रमं समित्र बांधवो भुक्त्वा म०
निनाय ससुहृन्निशां एवं प्रायदिनाचारो भ्रातृभ्यां सह राघवः आगत्य तीर्थयात्रायाः समुवासपितुर्गृहे ११ नृपति टी०
संव्यवहारमनोज्ञया सुजनचेतसि चंद्रिकानया परिनिनायदिनानि स चेष्टया स्तनसुधारससंघ शालया नृप १२ इति
श्री वाशिष्ठे महारामायणे दिवसव्यवहारनिरूपणं नाम चतुर्थः सर्गः ॥४॥ श्री वाल्मीकिरुवाच ॥ अथोनषोडशे वर्षे वर्तमा
ने रघूद्वहे रामानुयायिनि तथा शत्रुघ्नलक्ष्मणेऽपि च १ भरतेसंस्थिते नित्यं मातामहगृहे सुखं पालयत्यवनिं राज्ञि यथाव
ॡ

माधुर्यरसयेशालया तथा पूर्वोक्तं यान्येष्ट्यादिनानि परिनिनाय अतिवाहयामेस ॥१२॥ इति श्री वाशिष्ठ ता० वैराग्यप्रकरणे चतुर्थः
सर्गः ॥४॥ रामस्य कापि कार्श्यादिनिर्वेदादेह वर्ण्यते रक्तस्नेहद्रुत्जित्ज्ञासेवे सिद्धो क्षेकरक्रमः इत्थं श्रीरामस्य चित्तमपुपायात्
प्रानचर्याप्रपवर्ण्यनत्फलवैराग्यादिसाधने सर्पति विवक्षुरुपक्रमते अथेति ऊनेचतुर्थांशेन षोडशे वर्षे वर्तमाने रामः कार्श्य
जगामेति चतुर्थेन संबंधः रघूद्वहे इति व्यवहितस्य रामसाहित्यस्य शत्रुघ्नलक्ष्मणस्य वा विशेषणं ननुरामरामर्षि रामः का
र्श्यं जगामेत्येतेनाननुयायपत्नेः ननुलक्ष्मणेऽपि इति ज्ञानवो विषये आश्रमभेदनं तेरणभावे स्वभावांतरलक्ष्य कांत्वभावलक्षणसमन्व

वासिष्ठ० १३

वा॰टी॰ सीदतीति निषीदत्यस्मिन्निति सदनं सभास्थानं प्रति हाराः द्वारपालाः स्वपतेर्नृपतेर्हि द्वास्थस्य स्वस्वामिनः सभाद्वास्थास्तत्र वाल्मीकस्य गतिं बुद्ध्वेति
बै॰ प्र॰ कर्मणा एव यो यत्र विवस्वान् वान् ९ असौ द्वास्थैर्निवेदितार्थो वाल्मीको यद्द्वारि प्रहरणः शक्तिधारी कर्क १० महातेजाः महाप्रभावः को
॥१५॥ न्यायातु बालभास्करवद्भासुरः तद्वदयाद्यनाय ज्वालाकृतेति श्रीमांस्तथोलसितवान् ११ तं राजद्वारप्रदेशं ऊर्ध्वतः सभासुरपताकांतं परितः
च्छ साग्विभयुरुषायुधं कीर्णं कांचनं व्याप्तं सौवर्णमिव पिंगलं १२ विश्वामित्रो मुनिः प्राप्त इति अनुद्धतया गिरा राजानि राजानं प्रति

तेगत्वा राजसदनं विश्वामित्रमर्षिं ततः प्राक्प्रवेदयामासुः प्रतिहाराः यतेस्तदा ९ अथ्यास्थानगतं भूपं राजमंडलमालिनं स
मुपेत्य त्वरायुक्तो वाल्मीकिसोव्यजिज्ञपत् देवद्वारि महातेजा बालभास्करभासुरः ज्वालाकृतजटाजूटः पुमांछ्रीमानवस्थितः
११ सभासुरपताकांतं साग्विभपुरुषायुधं कृतवांस्तं प्रदेशाय स्तेजोभिः कीर्णकंचनं १२ वीक्षमाणेन तु वाल्मीके निवेदयति राज
नि विश्वामित्रो मुनिः प्राप्त इत्यनुद्धतया गिरा इति वाल्मीकवचनमाकर्ण्य नृपसत्तमः ससमंत्री ससामंतः प्रोत्तस्थौ हेमविष्टरा
त् १४ पदातिरेव सहसा राज्ञां वृंदेन मालितः वसिष्ठवामदेवाभ्यां सहसामंतु संस्तुतः १५ जगाम यत्र तत्रासौ विश्वामित्रो महा
मुनिः ददर्श मुनिशार्दूलं द्वारभूमाववस्थितं १६ केनापि कारणेनोर्वीतलमर्कमुपागतं ब्राह्मेण तेजसा क्रांतं क्षात्रेण च
महोजसा १७ जराजरठ्यानित्यं तपः प्रसरकृत्तया जटावल्या वृतस्कंधं ससंध्याभ्रमिवाचलं १८ श्री॰ श्री॰ श्री॰ ॥७॥

निवेदयति विज्ञापनं कुर्वाणे वाल्मीके वीक्ष्यमाणेन तु दृष्टमात्रे सति स राजसत्तमः प्रोत्तस्थाविति उत्तरेण संबंधः १३ किमनवधार्यैव
नेत्याह इति वाल्मीकवचनमाकर्ण्येति सामंताः अल्पदेशाधीश्वराः विष्टरात् सिंहासनात् १४ मालितो वेष्टितः सेवाजसत्तमः वसि
ष्ठवामदेवाभ्यां सह जगामेत्युत्तरेणान्वयः यत्र विश्वामित्रो महामुनिस्तत्रासौ जगामेति संबंधः १६ तपः पराक्रमाभिव्यंजकैवलक्षणा रामः
भ्यामोजस्तेजसो भेदः १७ जराजठरया वयः प्रकर्षपलितया १८ श्रीरामचंद्राय नमः ॥ ॥ श्रीहनुमतमूर्तये नमः ॥०॥०॥०॥० १५

25

संतः अल्पेन कारणवशेन कोयं विषादकलनां च न वहति यथा महांति भूतानि पृथिव्यादीनि सर्गेण सृष्टिफलवशेन संहारे वेगेन च विना
न विकारं व्रजंति नोपचयापचयविकारं भजंते ॥२५॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे वैराग्यप्रकरणे पंचमः सर्गः ॥५॥ ॥ ॥ ॥ ॥ ॥ ॥
न विकारं व्रजंति नोपचयापचयविकारं भजंते मुनिनाथेन वशिष्ठेन इति उक्तप्रकारेण सामान्या
विश्वामित्रागमो राज्ञा विधिवत्पूजने भुंजे राज्ञः प्रश्नः कार्यस्य प्रतिज्ञा चात्र वर्ण्यते मुनिनाथेन वशिष्ठेन इति उक्तप्रकारेण सामान्या
कारेण त्यर्थः अत एव पार्थिवे विशेषे संदेहवति सति निर्णयाय कंचित्कालं पश्यते किंचित्कालं प्रतीक्षणं यस्य तथा भूते सति १ राज्ञी

कोयं विषादकलनां वितनं च वहेत् नाल्पेन कारणवशेन वहंति संतः सर्गेण संततिजवेन विनाजगत्यां भूतानि भूपन महांति विकार
वंति ॥२५॥ इति श्रीवैराग्यप्रकरणे कार्यनिवेदनं पंचमः सर्गः ॥५॥ श्रीवाल्मीकिरुवाच ॥ इत्युक्ते मुनिनाथेन संदेहवति पार्थिवे
इत्यास्थितेमौने किंचित्काले प्रतीक्षणे १ परिखिन्नासु सर्वासु राज्ञीषु नृपसद्मसु स्थितासु सावधानासु राजस्वेवासु सर्वतः
२ एतस्मिन्नेव काले तु विश्वामित्र इति श्रुतः महर्षिरभ्यगात् द्रष्टुं तं बोधानराधिपं ३ तस्य द्वारपरस्तोभिस्तथा विलुलुपे किल ४
मायावीर्यमनोन्मेषे धर्मकार्यस्य धीमतः ४ स्वार्थं तस्य यतस्य दृष्टुं मेच्छत्स पार्थिवे नहि प्राक्तोत्य विघ्नेन समाप्तुं स मुनिः क्रतु ५ त
न स्तैर्बा विना शार्थं मुद्रात्तनृपसन्निधिः विश्वामित्रो महातेजा अयोध्यां अभ्यगात् पुरीं ६ स राज्ञो दर्शनाकांक्षी द्वाराध्यक्षानुवाच ह ।
शीघ्रमाख्यात मां प्राप्तं कौशिकं गाधिनः सुतं ७ तस्य तद्वचनं श्रुत्वा द्वास्था राजगृहे ययुः संभ्रांतमनसः सर्वे तेन वाक्येन चोदिताः ८ ।

पुरीषु नृपसद्मसु इति संबंधः राज्ञीभेदात् नृपभेदः प्रसिद्ध इति वचनं चेष्टाविशेष लिंगेन निर्वेदकारणपरिज्ञानाय सावधानासु २ ।
एतस्मिन्निति यद्यपि भावः लक्षणा सप्तमी निर्वेद कालविशेषोपलक्ष्यते तथापि लोकदृष्ट्या अनवसरे विश्वामित्रागमनमिति सूचनाय ॥
विशिष्यकाले इत्युपादानं पुनः विश्रुतः ३ धर्मार्थकार्यः स्वयं यत्कर्तव्यः तस्य तथा भूतस्य यज्ञं तथा विलुलुपे यथा सनं नराधिप
मभ्यगादिति पूर्वेणवा यावर्थिवे द्रष्टुमैच्छदिति उत्तरेण वा संबंधः ४ समाप्तुं समापयितुं सम्यक् समाप्तिः प्राप्तुं वा ५ उपनत उपयुक्तः ६ आख्यात
रखा १

बा.टी. अनुग्रहमेव भावि भाग्यानुरूपं स्वयमन्निरूपयतीति यदिति अनादिकारणरहितं अनेनोत्पत्तिवृद्धिपरिणामानं निरामयः अत्रत्रणमनप
बे.प्र. त्वं अपायेन विना शेन विवर्जितं औपाधिकैः स्वाराज्यसुखलवैः सर्वोनानंदयतीत्यानंदः परमरसस्वरूपत्वार्थ सुखं प्रसिद्धं तदेव प्राप्तमित्य
२६ र्थः २८ धन्यानां कृतार्थानां धुरि अग्रस्थाने लक्ष्मीभव प्रधानो निर्दिष्टः लक्षणं २९ एवं दशरथोक्तप्रकारेण ते राजानो महर्षयस्य कथ
यंतः अथ सभास्थानमासाद्य आसनेषु समुपाविशन्नित्यन्वयः ३० लक्ष्म्यातयोलक्ष्म्यामीतः अर्घ्यार्घ्ये सोदकस्यान्नस्य द्वारा आहरणे

तो२

यदनादिपरत्तुणं पदपायविवर्जितं तदानंदसुखं प्राप्तं मयात्वद्दर्शनान्मुने २८ अथवर्णोमहेतूनं धन्यानां धुरि धर्मतः भव
दागमनस्पेमे यद्धे लस्ममार्गेः २९ एवं प्रकथयंतोत्र राजानोथ महर्षयः आसनेषु सभास्थानमासाद्य समुपाविशन् ३०
सद्छ्यामालितं लक्ष्म्या भीतं कुमिष्विसन्नमे प्रहृष्टवदनो राजा स्वयमर्घ्यं न्यवेदयत् सराज्ञः प्रतिगृह्यार्घ्यं शास्त्रदृष्टेन कर्मणा
प्रदक्षिणं प्रकुर्वंतं राजानं पर्यपूजयत् ३२ सराजा पूजितस्तेन प्रहृष्टवदनस्तथा कुशलं चाव्ययं चैव पर्यपृच्छन्नराधिपं ३३
26 वशिष्ठेन समागम्य प्रहस्य मुनिपुंगवः यथार्हं चार्चयित्वैनं प्रपच्छानामयं ततः ३४ सर्वं यथार्हमन्योन्यं पूजयित्वा समेत्य
च तेसर्वेहृष्टमनसो महाराजनिवेशने ३५ यथोचितासनगताभिष्याः संहृष्टतेजसः परस्परेण पप्रच्छुः सर्वे नामयमादरात् ३६
उपविष्टाय तस्मै स विश्वामित्राय धीमते पाद्यमर्घ्यं च गां चैव भूयोभूयो न्यवेदयत् ३७ अर्चयित्वा तु विधिवद्विश्वामित्रमभाष
त प्रांजलिः प्रयतो वाक्यमिदं प्रीतमनान्तपः ३८

।पराधशंकया स्वयमेवाहत्यार्घ्यं ददौ इत्यर्थः ३१ पर्यपूजयत् प्रशशंस ३२ कुशलं देहसंबंधिमत्यादिषु अव्ययं कोशेषु एव वशि
ष्ठमर्चयित्वा यथार्हं शिष्यमगाय स्यादि ध्वनामयं पप्रच्छेत्यर्थः ३४ अन्योन्यं समेत्य पूजयित्वा च यथोचिते सनगताः संतः पप्रच्छुरित्य
न्वरेणासं वंधः ३५ ३६ आद्येन चकारेण अनुक्तगंधपुष्पवस्त्रालंकारादेः समुच्चयः द्वितीयेन दक्षिणाफलतांबूलादेः तेषां चव राम.
बहुविधत्वाद्भूयो भूय इति ३७ प्रयतः पवित्रः इदं वक्ष्यमाणम् ३८ श्रीरघुनाथजी की जय ।। ।।हनुमते नमः ।।०।।०।।० २६

दीप्तं तेजः प्रकर्षाद् दुर्दर्शं उपशान्तं सौम्यं अप्रतिघाति अप्रधृष्यं कान्तं प्रियदर्शनं ऊर्जितः प्रगल्भः आकारः अवयवसंनिवेशो यस्य तत्तथोक्तं निर्वृत्तं निष्पन्नं भास्वरं कांतिमत् भास्करमिति पाठे सूर्य सदृशमेव यथा दित्येनाक्रमपूर्वविशेषणान्यन्वयं योज्यानि १९ पेशलेन रम्येण मनःप्रीणनचतुरेण भीमेन भयानकेन आकुलेन प्रकर्षाचलता गंभीरेण अनाकलनीयान्तेन पूर्णेन परिक्षेपेन आक्रम्य संवलित तेजः बहिः प्रसृता प्रभा तेजः प्रकर्षं वेलन्तरूपानुविधायित्वात्प्रभा प्रकर्षं वेलन्तरूपानां तद्नुरूपो सा तेन रंजिते

उपशांतं च कांतं च दीप्तमप्रतिघाति च निर्वृत्तं प्रोर्जिताकारं दधानं भास्करं वपुः १९ पेशलेनातिभीमेन प्रसन्नेनानाकुलेन च गंभीरेणातिपूर्णेन तेजसा रंजितप्रभं २० अनंतजीवितं दस्रा सखीमिव कामिनीं दत्तां धारयंतं करे म्लानां अक्षमालां कुंडीं अम्लानमनसि २१ करस्थाकांतं वचनं सत्वाम्नसवत् मधुरास्वरैः वीक्षणेन मृतेनेव संसिंचंतमिमाः प्रजाः २२ यज्ञोपवीतांगं धवलप्रोन्नतभ्रुवं अनंतं विस्मयं चोतः प्रयुक्तं तं मिदं ति नुः २३ मुनिनालोक्य भूपालो दूरादेव नतः कृतिः प्रणाम गलन्मौलि मणिमालिन भूतले २४ मुनिरप्यवनीनाथं भास्वान् इव शतक्रतुं तत्राभिवादयांचक्रे मधुरोदारया गिरा २५ न तोयवर्षि प्रमुखाः सर्वे एव द्विजालयः स्वागतादि भगवते नेप्रजयामासुरादृताः २६ ॥वैशंपायन उवाच॥ अशंकितोपनीतेन भास्वता दर्शनेन तं साधयन् अनुगृहीतात्मानः रविणैव भुजा करा २७ श्रीरामचन्द्राय नमः ॥०॥

वेतिन चोक्तिः २० अनंतजीवितं दस्रा चिरजीवितं दत्तवत्याः सखीमिव परिगृहीता नित्यर्थः म्लानां अक्षमालां कुंडी कमंडलुं अम्लानं प्रसन्नं मानं मनो यस्य २१ मधुराः अक्षरा यस्मिन् सभाषणानि तेषु मधुराभावेण सहितेनेत्यर्थः २२ यज्ञो निवपः प्रकर्षाद्नुरूपाः यज्ञोपवीतान्यंगे यस्य तं २३ दूरादालोक्य पूर्वमेवानतः कृतिः भूपालो मुनिं प्रणमेनेति संबंधः अंत्यपदं क्रियाविशेषणं २४ अभिवादयांचक्रे संपूजनमाशीर्भिः प्रत्यभिवादयामास इत्यर्थः २५ प्रजयामासुः प्रशशंसुः आदृता आधृता आप्रशशंसुः आदृतां आदरयु

लो २६ अशंकितोपनीतेन श्रवणार्थैः शोषणातिना इति

कर्णिका टीका वासुकी १७

वा.टी.
वै.प.
॥२७॥

सदा मान्योऽसीति हेतोः तदुभयं कृतमित्येव विद्धि ५२ अर्थेः कर्तुमशक्यमपि करिष्याम्येवं दातुमशक्यमपि दास्याम्येव यस्मात् प्रमा-
णं वक्तुर्त्वयित्वा हृदि सत्यानि प्रतिपद्यते प्रतिपत्ति लाभेन सार्थकं भवतीति भावः ५३ स्यात्तु पुर इति शेषः वने रक्षणवनो द्भुतेर्दुर्गरक्षोत्तरेण
सपैलव तथा मम आज्ञा न्न्यात् रणे हतिबाद्धेः ५४ ननु महत्सैन्ये मया वा तेन निग्राह्या इति राजाभिसंधिमाले स्याह तेषां चेति काकु
स्थान् कृता द्यामान् ५५ तत्कुतः तत्राह वीर्ये ति उत्सि काग र्विताः न केवलं स्वबले नेव किंतु स्वामिबलेनापी त्याह रवरे ति ५६ तर्हि
तन्न स्यापि तेकथं साध्यास्त त्राह रामस्ये ति अनारतगताः अविरत निर्गताः यथा हस्य भि भवेत्तमा अपि पांसवो न हे स्यामि भवेत्तमा

यत्कार्यं येन वार्थेन प्राप्तोऽसि मुनिपुंगव कृतमित्येव तद्विद्धि मान्योऽसीति सदा मम ५२ स्वकार्ये न विमर्शं त्वं कर्तुमर्हसि कौशिक
भगवन्नास्य देयं मे त्वयि यत्प्रतिपद्यते ५३ न च तेन राम मासाद्य स्थातुं शक्ता निशाचराः क्रुद्धं केसरिणं दृष्ट्वा वने रणे इवैणका ५४
तेचनान्यः काकुत्स्था योद्धुमुत्सहते पुमान् अनेके सरितः क्रुद्धान् ज्ञानां कारिणामिव ५५ वीर्योत्सिक्ता हि ते पापाः कालकूट
रोपमा रणे खरदूषणयोर्भृत्याः कृतान्ताः कुपिता इव ५६ रामस्य राजशार्दूल सहिष्यन्ते न सायकान् अनातैर्गता धाराजलदे
स्येवयांसवः ५७ न च पुत्रकृतं स्नेहं कर्तुमर्हसि पार्थिव नतदस्ति जगत्यस्मिन्यन्न देयं महात्मनां ५८ हन्त नूनं विजानामि हतांस्तां
न्विद्धि राक्षसान् न ह्यस्मदाद्यः प्राज्ञाः संदिग्धे संप्रवर्तनः ५९ अहं वेद्मि महात्मानं रामं राजीवलोचनं वशिष्ठश्च महातेजा ये चान्ये
८४

27

सदुद्दिव्यः ५७ भवतु तथा तथापि पुत्रो दुस्त्यजः पितृभिरित्याशंक्याह न चेति मम पुत्रो यत्नीति प्राकृतस्नेहमनुरागं तत्कृतस्नु आहन
तद्विति तथाहि शि विदधीच्यलर्कप्रभृतयः स्वदेहचक्षुरादीनपि ददुरिति भावः ५८ नात्रापायशंकापि किंतु विजयाभ्युदय एवेत्या
हहंतेति नूनमिति निश्चये विजा नामि तपसेति शेषः त्वमपि विद्धि मद्वचसेति शेषः जगदेवद्वच्यतिनहीति ५९ महांतं जीवापाध्यपरि
छिन्नमात्मानमीश्वरमित्यर्थः प्रमावेत्यामहात्मानं वशिष्ठश्चवेत्तीति विपरिणामेनानुषङ्गः एवमन्ये अपि दीर्घदर्शिनो योगसिद्धाद्य

यथायोगं सर्पस्य कर्षकस्येति शेषः ४९ अर्थलाभो दरिद्रस्येति शेषः ५० ईप्सितेन चराभिलाषितेन महिषी संयोग अभ्युदयादिन्या दृष्टस्य
प्रियतमस्य पुत्रभ्रात्रादेः सुरादेरिति शेषः ५१ त्वदागमनात् हर्ष इत्यनुषज्यते ५२ ५३ प्रथमः प्रश्नः प्रेष्यविषयः द्वितीयः कर्तव्यसे-
वाविषयः प्रज्ञापात्रत्वमेवोपपादयति पूर्वमिति तपसा ब्रह्मर्षित्वमनुप्राप्त इति संबंधः ५५ प्रीतिर्यतितापशांत्या सुखयति मु-
ख्यार्थो भेदोऽत्रेत्यार्थ इव शब्दः ५६ इच्छादीनां परोपसर्पणहेतुत्वं प्रसिद्धं विषयस्नेहहानिशयो विषया कारेण चित्तस्य रंजनाद्रागः

यथामृतस्य संप्राप्तिर्यथा वर्षमवर्षके यथांधस्य च चक्षुःप्राप्तिर्भवदागमनं तथा ४९ यथेष्टदारसंपर्कात्पुत्रजन्माप्र-
जावतः स्वप्नदृष्टार्थलाभश्च भवदागमनं तथा ५० यथेप्सितेन संयोग इष्टस्यागमनं यथा प्रनष्टस्य यथा लाभो भवदागम-
नं तथा ५१ यथा हर्षो न भोगत्यामृतस्य पुनरागमात् तथा त्वदागमाद्ब्रह्मन् स्वागतं ते महामुने ५२ ब्रह्मलोकनिवासो
हि कस्य न प्रीतिमावहेत् मुने तवागमस्तद्वत्सत्यमेव ब्रवीमि ते ५३ कश्च ते परमः कामः किं चैतत्करवाण्यहं पात्रभूतोसि
मे विप्र प्राप्तः परमधार्मिकः ५४ पूर्वं राजर्षिशब्देन तपसा द्योतितप्रभः ब्रह्मर्षित्वमनुप्राप्तः पूज्योसि भगवान्मया ५५ गं-
गाजलाभिषेकेण यथा प्रीतिर्भवेन्मम तथा त्वद्दर्शनात्प्रीतिरंतः प्रीणयतीव मां ५६ विगतेच्छाभयक्रोधो वीतरागो निरा-
मयः इदमत्यद्भुतं ब्रह्मन्यद्भवान्मामुपागतः ५७ शुभक्षेत्रगतं चाहमात्मानमपकल्मषं चेदनिवद्बोनमस्यं वेदवेदावि-
दां वर ५८ साक्षादिव ब्रह्मणो मे तवाभ्यागमनं मतं पूतोस्म्यनुगृहीतश्च तवाभ्यागमनान्मुने ५९ त्वदागमनपुण्येन साधो
यदनुरंजितं अद्य मे सफलं जन्म जीवितं च सुजीवितं ६० त्वामिहाभ्यागतं दृष्ट्वा प्रतिपूज्य प्रणम्य च आत्मन्येव न माम्यत

५७ देवर्षिजुष्टस्थानानामिव क्षेत्रत्वात्त्वत्सान्निध्यानाद्ब्रह्मन्यपि तत्येति भावः अतएवापकल्मषमपगतपापं अत एव धर्मात्कर्षादम
तमय चंद्रमंडलप्राप्यानंतोन्मग्न निवेशनेन स्त ५८ धर्मेण पूतः यशोभ्युदयाभ्यामनुगृहीतः ५९ तदेव स्फुटयति त्वदिति ६० पुरुषहू-
र्षाभ्यामभिवृद्ध्या दात्मनि शरीरे अस्यांतः स्वांतो वनसमामीत्यर्थः अतविषे वेलास्तीत्यादि इति शेषः ६१ श्रीरामचंद्राय नमः ॥

वा.टी. बे.अ. १८

विबुधव्रजान्देवसंघात् ५ विहिते अनुष्ठिते ६ अवधूते विघ्ने निरस्ते यागकर्दमके यज्ञसमूहे ७ ननु शापेनैव तेन कुतो न निरस्तास्तत्रा
हनचेति ८ ईदृशी क्रोधस्यायोग्या प्रापयेयं स्वार्थं शिवसंगुणं सतमे साधुतमे सततम इति पाठे तु संबोधनं अभिभवसि रक्षा
र्थः अर्थोस्तमानां रेकयद्यंवा १० ऊर्ध्वमतमिति दर्शनात् अयज्ञ्वस्य धासार्थ विशेषणानि वि वक्षितार्थोपयादकानि ११ सत्यपरा

यदा यदा तु यज्ञेन यजेहं विबुधव्रजान् तदा तदा तु मे यज्ञं विनिघ्नंति निशाचराः ५ बहुशो विहिते तस्मिन्मया राक्षसनाय
काः अकिरंस्ते महीं यागे मांसेन रुधिरेण च ६ अवधूते तथा भूते तस्मिन्यागकर्दमके कृतश्रमो निरुत्साहस्तस्माद्देशा
दपागतः ७ न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव तथाभूतं हि तत्कर्म न शापस्तस्य विद्यते ८ ईदृशी यज्ञदीक्षा साम
म तस्मिन्महाक्रतौ त्वत्प्रसादादविघ्नेन प्रापयेयं महाफलं ९ त्रातुमर्हसि मामार्त्तं शरणार्थिनमागतं अर्थिनां यन्निराश
त्वं सतामभिभवो हि सः १० तवास्ति तनयः श्रीमान्व्याघ्रशार्दूलविक्रमः महेंद्रसदृशो वीर्ये रामो रक्षोविदारणः ११ तं पुत्रं राजशार्दू
ल रामं सत्यपराक्रमं काकपक्षधरं शूरं ज्येष्ठं मे दातुमर्हसि १२ शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा राक्षसा ये विकर्तार
स्तेषामपि विनिग्रहे १३ श्रेयश्चास्मै करिष्यामि बहुरूपमनंतकं त्रयाणामपि लोकानां येन ख्यातो भविष्यति १४ नात्यति कालः
कालोऽयं यथायं मम राघव तथा कुरुष्व भद्रं ते मा शोके मनः कृथाः १५ कार्यमेतद्यापि कालेन कृतमेतदुपकारितां महदप्युपका

क्रम मम मे पराक्रमं काकपक्षो कर्णमूलशिखे स्वस्तिर्याचारसिद्धे १२ ननु कृतास्त्रो बालोयं कथं शक्तस्तत्राह शक्त इति गुप्तो रक्षितः अपक
र्त्तारो यज्ञस्य लोकस्य तिवा शेषः मृर्द्ध विनिग्रहे शिरश्छेदे १३ श्रेयः अस्त्रविद्याप्रदानरूपं अस्त्रमिदाहृतरूपप्रभावतस्त्वनंतकमनवधिकं
१४ कालाय यज्ञांगभूतो वसंतादिर्येषां नात्येतीति संबंधः १५ अभिलषितसाधनानुग्रहरूप उपकारः तद्भावमहद्धनु विजयाया ससाध्य राम
मपि कार्यफलरिक्ततामेति सम्पन्नफलत्वेनोपकारोपि प्रीतिरिक्ततामेत्यर्थः १६ श्रीरामचंद्रायनमः ॥ ॥ ॥०॥ ॥ ॥० हनुमतेनमः॥ १८

ती९

78

धर्मो महत्त्वं च यशश्च स्वमिति मनसि निश्चितं यदि तर्हि समभिप्रेतं प्रियतममित्यात्मजविशेषणं सम्यगभिप्रेतम् अध्यवसितं यथा भवतीति क्रियाविशेषणं वा ६१ दशरात्रोऽदशाहो यज्ञसाध्यः ६२ अस्मिन्नर्थे तत्र मंत्रिगणः सर्वे वसिष्ठप्रमुखाश्चापीति संबंधः तेन तेषामनुज्ञादानेन ६३ उत्साहातिशयात्पूर्वोक्तमेव पुनराह कार्यस्येति लोभादितिन्तु कृत्वं वारयति धर्मतः कर्त्तेति ६४ आत्मविद्यस्वतयः प्रभवाभिज्ञेनगुणैर्विशिष्टमिति वाक्यविशेषणं ॥६५॥ इति श्रीवाल्मीकीयरामा० वैराग्य० अष्टा: सर्गः ॥१८॥ राज्ञः प्रशंसात्मुनेर्यत्तद्विप्रनिवेदनं ॥

रा०बा०३

यदि धर्मो महत्त्वं च यशस्ते मनसि स्थितं तन्मह्यं समभिप्रेतमात्मजं दातुमर्हसि ६२ दशरात्रं हि यज्ञो यस्मिन् रामेण राक्षसाः हंतव्या विप्रकर्त्तारो मम यज्ञस्य वैरिणः ६३ अत्राप्यनुज्ञां काकुत्स्थ ददतां तव मंत्रिणः वसिष्ठप्रमुखाः सर्वे तेन रामं विसर्जय ६४ कार्यस्य न विनाशस्त्वं कर्तुमर्हसि धर्मतः कर्त्ता चाहमशेषाणां देवानां परमं जगाम हर्षं ॥६५॥ इति विश्वामित्राभ्यागतं नाम अष्टादशः सर्गः ॥१८॥ श्रीवाल्मीकिरुवाच ॥ तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरं हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत १ सदृशं राजशार्दूल तवैवैतन्महीतले महावंशप्रसूतस्य वसिष्ठव्यपदेशिनः २ यत्तु मे हृद्गतं वाक्यं तस्य कार्यविनिर्णयं कुरुष्व राजशार्दूल धर्मं समनुपालय ३ अहं धर्मं समातिष्ठे सिद्ध्यर्थं पुरुषर्षभ तस्य वि ॥ घ्नकरा घोरा राक्षसा मम संस्थिताः ४ ॥

तेवधायरामस्य याञ्चावाचो पवर्ण्यते अद्भुतविस्तरं आश्चर्यार्थविस्तारयुक्तं १ सदृशं युक्तं तवैतत्तु गर्भविशेषणेवंशप्रभावादुरुप्रभावात्मार्थः २ हृद्गतं विवक्षितं तस्य कार्यविनिर्णयं तत्संबंधिकर्त्तव्यार्थनिश्चयं कुरुष्व अभिनिवेशः तत्कदाचिद् धर्मश्चेद्दशाकामित्यासंक्याह धर्ममिति ३ तदेवाह अहमित्यादिना धर्मं यज्ञं समातिष्ठे आरभे ४ ॥०॥०॥०॥०॥०॥०॥०

वा॰टी॰ धत्वाये: श्रुहिंवोतेला निश्वास्याणि त्रिशोये: श्रहियेतेना भ्यस्ता लिस्मलकोटीनां समरभूमिष्वितिसंबंध: तत्त्वोयुद्ध त्त: वैशारद्यहृस्त्ता
वै॰रा॰ नमस्येनाल्लीतिभाव: ७ परिशीलनं श्रेयस्येतिशेष: प्रतिङ्गपाठेतु परिमितं शीलनमस्येति बहुव्रीहि: कीर्ण पुष्पारोपयोपहार: पुष्पा
१९॥ यासुकासुखीयासु अजिरभूमिषु चत्वरस्थलेषु ९ अतितरामित्यस्य पश्यतेन हरिण: कृशइत्याभ्यां संबंध: हरिण: पांडुर: त
त्रहेतु: तः पयेप श्रयाबाश्रा भातीति पयामस्तदाकर: आतश्चोपसर्ग इति क: सह मेनतु बारेणेव १० विहर्तुं संचरितुं क्रीडितुम्

ॐ
नपास्त्रै: परमैर्युक्तोनचयुविशारद: नवास्त्रै: सूरकोटीनां तत्त्व: समरभूमिषु ७ केवलं पुष्पखंडेषु नगरोपवनेषुच उद्या
नवनकुंजेषु सदैव परिशीलनं ८ विहर्तुमियजानाति सह राजकुमारकै: कीर्णपुष्पोपहारासु सुखकास्वजिरभूमिषु ९ अ
धत्व तिनरान्त्रसन्मम भाग्यविपर्ययात् हिमेनेवाहिपद्माभ: संपन्नोहरिण: कृश: १० नानुमन्तानिशाङ्कोतिना विहर्तुं गह
वनं श्रुत: स्वेदपरीतात्मातृस्नीतिकेति केवलं ११ सदार: सहभ्रत्योहं तत्कृते मुनिनायक: शरदीवपयोवाहोन्तूनेनि:सा
रतां गत: १२ ईदृशोसौ सुतो बाल श्राधिनाथवशीकृत: कथं दास्यामि तं तुभ्यं योद्धुं सह निशाचरै: १३ अपि वालोगेनास
जाद्यपि साधोसुधारसात् राजादपि सुखायेव पुत्रस्नेहो महामते १४ येदुरंता महारंभास्त्रिषु लोकेषु खेदद: पुत्रस्नेहेन सं
तोपि कुर्वन्तेतान संशय: १५ असवोपि धनं दारास्त्यजन्ते मानवै: सुखं न पुत्रा मुनिशार्दूल स्वभावो ह्येषजंतुषु १६ राक्षसा
"क्रूरकर्माण: कूटयुद्धविशारदा: रामस्तान्योधयत्विस्थं युक्तिरेवातिदु:सहा १७॥०॥

तिनुन अकर्मकतायेत ११ तत्कृते तन्निमित्तं नि:सारितां निरुत्साहबलतां नि: सत्वतां वा १२ ईदृश इति शरीरेण बाल इति वयसा आधि
नावशीकृत इति तुच्छाद्विना वनस्याशक्तता प्रेमव्यानईताच दर्शितात्वत्रा पिबोद्धुं तद्योपि निशाचरै: सहसुत रामयुक्त इति भाव: १३।
ने॰ ननुधर्मलिप्सास्तवकितद्विराधिना पुत्रस्नेहस्यापांकायाह अयीति उक्तसुखान्येव हि धर्मफलं तानि पुत्रमुखे नातिश्रेयस्तु इति भाव: १४।
दुरंताश्चिरसाध्या: नप: क्लेशालाव संतो धार्मिको अपि १५ सुखं त्यजन्त इति विपरिणामेनानुषंग: १६ इत्थं पूर्वोक्तप्रकारेण स्थितो
राम॰ १९

मुनिर्वाक्यमुपसंहरति इत्येवमिति २७ उपपन्नानि युक्तानि पदानि प्रसिद्धानि चनीयवस्तूनि यस्मिन्कर्मणि तत्तथा ननु शाकमुच्यतां किमु
पपन्नं चिंतयेतित्राह धीमानिति लोको मनोरथपूर्त्यापि तुष्यति धीमांस्तु तत्पूर्त्ता विषयिण्यपि युक्तकथनेन विना न तुष्यतीति युक्तमुपप
त्तिचिंतितिभावः २८ ॥ इति श्रीवाशिष्ठ० वैराग्य० सप्तमः सर्गः ॥ ७ ॥ स्नेहातिशयोत्र रामस्य युद्धायोग्यत्ववर्णनं रावणादिबलं ज्ञात्वा विषादस्त्री
पवर्ण्यते उपपन्नं सुरोत्तरालाभान्निश्चेष्टः पूर्वोक्तरामदर्शनानुसंधानात्प्रतिज्ञाताप्यसामर्थ्यान्मुनिवचनस्य च दुरन्तत्वात्सुदैन्यं सदैव।

२
इत्येवमुक्त्वा धर्मात्मा धर्मार्थसहितं वचः। विरराम महातेजा विश्वामित्रो मुनीश्वरः २७ श्रुत्वा वचो मुनिवरस्य महानुभावस्तूष्णीं
मतिरुपपन्नपदं सवर्क्कं नोपुप्तियुक्तकथनेन विनेति तोषं धीमान् पूरितमनोभिमतश्च लोकः ॥ २८ ॥ इति श्रीवाशिष्ठमहारामाय
णे विश्वामित्रवाक्यं नाम सप्तमः सर्गः ॥ ७ ॥ श्रीवाल्मीकिरुवाच ॥ तच्छ्रुत्वा राजशार्दूलो विश्वामित्रस्य भाषितं मुहूर्तमासीन्नि।
श्चेष्टः सुदैन्यं चेदमब्रवीत् १ ऊनषोडशवर्षोयं रामो राजीवलोचनः नयुद्धयोग्यतामस्य पश्यामि सह राक्षसैः २ इयमक्षौहि
णी पूर्णा यस्याः पतिरहं प्रभो तया परिवृतो युद्धं दास्यामि पिशिताशिनां ३ इमे हि शूरा विक्रान्ता भृत्या मेऽस्त्रविशारदाः अहं
चैषां धनुष्पाणिर्गोप्ता समरमूर्द्धनि ४ एभिः सहैव वीराणां महेन्द्रमरतामपि ददामि युद्धं मत्तानां करिणामिव केसरी ५।
बालो रामस्त्वनीकेषु न जानाति बलाबलं अन्तःपुरादृते दृष्टा नानेनान्या रणावनिः ६ ॥ ०७ ॥ ०७ ॥ ० ॥ ० ॥ श्रीहनुमते।

प्रमाणं १ किंचिदूनः षोडशो वर्षो अस्येति त्रिपदबहुव्रीहिः युद्धयोग्यत्वेन नास्ति राक्षसैः सह तु सुतरामिति भावः २ तर्हि कीदृ।
शः प्रयासः तेनाह इयमिति अक्षौहिणीलक्षणं तु एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका पत्त्यंगैस्त्रिगुणैः सर्वैः क्रमादाख्या
यथोत्तरं सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः अनीकिनी दशानीकिन्यक्षौहिणीत्यमरसिंहेनैव भारतादिप्रसिद्धं सग्र॥
ह्योक्तं ३ अत्र युद्धे गोप्ता रक्षकः ४ महेन्द्रादीनपि महतां मत्ततेन रणावनिर्न दृष्टेत्येव वक्तव्ये अन्यापि विपोषणं वेपथ्योत्स्वं नर्हि पर
स्यान्तरंतः ५ पुरमित्यव्ययीभावः पुरमध्ये वर्तनी कीडार्थकल्पितरणावनेरन्या न दृष्टेत्यर्थः ६ श्रीकृष्ण ॥ ० ॥ ७ ॥ ७ ॥ ७ ॥

तदेवसु दयति श्रूयतइति २७ किलेतिसंभावने सचेन्नृशंसेन संबंधः ततर्हि २८ तत्कुतस्तत्राह कालइति पर्य्यगिति कदाचित्केचुवे देवेतिस्यवस्यथेत्यर्थः वीर्याति भूतय इत्येतिद्वंद्वगर्भकर्मधारयः २९ किंततस्तत्राह अयेति अस्मिन्कालेन समर्थास्तत्राप्यद्य सुतरामेत्याशयः नियतेर्दैवस्य ईश्वरस्येति यावत् ३० अन्वयः पुत्रः पुत्रकस्तस्मिन् अर्थिमनोरथसमर्थना समर्थत्वादलमा ग्यस्य ३१ ननुकुतस्तवेदृशम धैर्यं तत्राह देवेति पुरुषाणामनुष्या ३२ महतां पूज्यतमानां वीर्यवतामिंद्रादीनामपि अदत्ते अपहर

अश्रूयतेहिमवान्वीर्ये रावणोनामराक्षसः साक्षाद्वैश्रवणभ्राता पुत्रोविश्रवसोमुने २७ सचेन्नवमखे विघ्नं करोतिकि लदुर्मतिः तत्संग्रामेनशक्ताः स्मोवयंतस्यदुरात्मनः २८ कालेकालेपदार्थानां हानिर्वृद्धिर्वीर्यविभूतयः भूतेश्वभुद्दयं याति प्रलीयंतेचकालतः २९ अयाख्मिंस्तुवयंकाले रावणादिषु शत्रुषु नसमर्थाः पुरः स्थातुं नियतेरयनिश्चयः ३०॥ तस्मात्प्रसादं धर्मज्ञ कुरुत्वं मम पुत्रके मम चैवाल्पभाग्यस्य भवान्हि परदैवतं ३१ देवदानवगंधर्वा यक्षाः पतगपन्नगाः नशक्ता रावणं योद्धुं किंपुनः पुरुषायुधि ३२ महावीर्यवतांवीर्यमादत्ते युधि राक्षसाः तेन सार्द्धं नशक्ताः स्मसंयुगे तस्य वालकेः ३३ अयमेन्यतमः कालः पेलवीकृतसज्जनः राघवोपि गतोदैन्यं यतो वार्द्धकजर्जरः ३४ अथवालवणं

तीव राक्षसो रावणः संयुगे योद्धुमिति शेषः येन सह वयं न शक्ताः स्म तस्य वालके किंशक्यमिति शेषः अथवा तस्य वालके रिंद्र्द्र ने तिप्रभृतिभिः सहापि न शक्ताः स्म इति पूर्वेण संबंधः ३३ अशक्तौ हेतुंतर माह अयमिति पेलवीकृता निर्बलीकृताः सज्जनाः येन स राघवः स्वयमेव वार्द्धकेन यतोजर्जरः शिथिलः अथवा राघवो रामः हेइक एवा वार्द्धकः सहवजर्जरः ३४ अयबेतिकल्पांतरे य गपूतंव तिशेषः कथयतु भवानिति शेषः असुरप्रस्थं दैत्यसदृसं दैत्याद्यस्तस्यामुत्पन्नत्वात् शैवमूलवलेन तस्मात्तयत्वान्मांधात्र

रामनीतेराक्षसवधोनसंभावितः प्रत्युतसपुत्रस्यममैववधः संपादितःस्यादित्याह चतुर्भिः तथात्वयन्नधर्मोपेतं यातवसहानधर्मःस्या
दितिभावः १८ ननुषष्टिवर्षसहस्राणिजातस्यममकौशिकेतिपूर्वरामायणे उक्तंकथमत्रउक्तं नवेत्यत आह नतुषष्टि
नोन्वयः किंतुनववर्षसहस्राणिपुत्रकाम्ययोपलक्षितस्यजातस्यममदुःखेनदुःखसाध्येनाश्वमेधपुत्रेष्ट्यादिनाचत्वारउत्पादिताइति १९
तेषुरामएवप्रधानभूतः यथाशरीरेषुप्राणः अतएवतेसोतिप्रियतमः किंतेनस्तत्राहतंविनेति २० यस्यलनयनेत्रयाणामन्येषामपिम

विप्रयुक्तोहिरामेणमुहूर्तमपिनोत्सहे जीवितुंजीवनाकांक्षीनरामंनेतुमर्हसि १८ नववर्षसहस्राणिममजातस्यकौशि
क दुःखेनोत्पादितास्तेमेचत्वारः पुत्रकाम्यया १९ प्रधानभूतस्तेष्वेवरामः कमललोचनः तंविनेहत्रयोप्यन्येधार
यंतिनजीवितं २० सएवरामोभवतानीयतेराक्षसान्प्रति यदितत्पुत्रहीनंत्वंमृतमेवाशुविद्धिमां २१ चतुर्णामात्मजानां
हिप्रीतिरत्रैवमेपरा ज्येष्ठधर्ममयंतस्मान्नरामंनेतुमर्हसि २२ निशाचरबलंहंतुंमुनेयदितवेप्सितं चतुरंगसमायुक्तं
मयासहबलंनय २३ किंवीर्याराक्षसास्तेतुकस्यपुत्राःकथंचते किंप्रमाणाःकेचैवरक्षंतियमेस्फुटं २४ कथंतेन
प्रहर्तव्यंतेषांरामेणरक्षसां मामकैर्वाबलैर्ब्रह्मन्मयावाकूटयोधिनां २५ सर्वंमेशंसभगवन्यथातेषांमहारणे स्था
तव्यंदुष्टभावानांवीर्योत्सिक्ताहिराक्षसाः २६

रणंसत्त्वात्द्रष्टोरामएवमत्पुत्रान्राक्षसान्प्रतिनीयतेभवतेतिचतुर्भिः पुत्रहीनंमांमृतमेवविद्धीत्यर्थः २१ चतुर्णांमरणादितिकिंवा
रामैकस्यनयनमात्रेणापित्वस्यमृत्युःसंभावितइतिप्रेत्याह चतुर्णामिति धर्ममयंधर्मप्रचुरं २२ पादरामेनतंयामितदाकथंत्वका
र्यसिद्धिस्तत्राह निशाचरंति हस्त्यश्वरथपादातेश्चतुरंगबलसैन्यं २३ अथविज्ञापनाकांक्षितिपरबलजिज्ञासुःपृच्छतिकिंवीर्याइति
कथंचतेवर्तंतइतिशेषः कियत्प्रमाणाः संख्यापरिमाणानकेचैवजानतः २४ प्रकर्तव्यंप्रकर्तव्यंप्रहर्तव्यामितिपाठस्यार्थं २५ वीर्ये

बालकाण्डटीका: नहिप्रविष्टः २८

वा.टी.
बै.प्र.
२१॥

जगन्मित्रं विश्वामित्रं विश्वस्य मित्रं विश्वामित्रं इति तत्सामार्थ्यमसिद्धेः मित्रे चर्षाविति पूर्वपदस्य दीर्घः यद्यपि वशिष्ठोपि कोपेन यतत्कोप
प्रतीकारसमर्थ तथापि नतु क्रोधयतो सोढव्यादि मानि तिभावः ६ त्रैलोक्येपि ये गुणवतां गुणाः प्रसिद्धास्तैः सर्वैर्भूषितः ७ तिज्ञा
नार्थपालनेन व्रतेन शोभनं यस्य तथाविधस्त्वं तावंतं कालं भूत्वेत्यर्थः भवच्छब्दः प्रथमपुरुषोपूर्ववत् धर्मेण प्रशंसावयुत इति त्रिषु
लोकेषु विख्यातः ८ स्वस्य स्वानी च धर्मं प्रतिज्ञापालनं प्रतिपद्यस्व निश्चयपि भुवनेश अभिलाषित संपादनैः ९ हे इति त्रिभुवनेशस्तस्य

क्रोधाभिभूतं विज्ञाय जगन्मित्रं महामुनिं धृतिमान्सुव्रतो धीमान्वशिष्ठो वाक्यमब्रवीत् ६ ॥ वशिष्ठ उवाच ॥ इक्ष्वाकूणां कुले केर
जातः साक्षाद्धर्म इवापरः भवान्दशरथः श्रीमांस्त्रैलोक्यगुणभूषितः ७ धृतिमान्सुव्रतो भूत्वा न धर्मं हातुमर्हसि त्रिषु लोकेषु वि
ख्यातो धर्मेण यशसा युतः ८ स्वधर्मं प्रतिपद्यस्व न धर्मं हातुमर्हसि मुनेस्त्रिभुवनेशस्य वचनं कर्तुमर्हसि ९ करिष्यामीति सं
श्रुत्य तत्ते राजन्नकुर्वतः इष्टापूर्तं हरेद्धर्मं तस्माद्रामं विसर्जय १० इक्ष्वाकुवंशजातोपि स्वयं दशरथोपि सन् न पालयसि चेद्वाक्यं को चेः
परः पालयिष्यति ११ युष्मदादिप्रसूतेन व्यवहारेण जंतवः मर्यादां न विमुंचंति तां न हातुं त्वमर्हसि १२ गुप्तं पुरुषसिंहेन
ज्वलनेनामृतं यथा कृतास्त्रमकृतास्त्रं वा नैनं शक्ष्यंति राक्षसाः १३ एष विग्रहवान्धर्म एष वीर्यवतां वरः एष बुद्ध्याधिको लो
के तपसां च परायणः १४ एषोस्त्रं विविधं वेत्ति त्रैलोक्ये सचराचरे नैनमन्यः पुमान्वेत्ति न च वेत्स्यति कश्चन १५ श्लो० ॥ क्रो०

27

९ ननु हरेदित्यर्थः १० यद्गुसं स्पंति राजानस्तद्वृत्तास्संति हि प्रजा इति भाषात्प्रजा मर्यादापालनायापि प्रतिज्ञा अवश्यं पालनीयेत्या
ह इक्ष्वाकु इति द्वाभ्यां न पालयस्यन्तीकं वाक्यं चेत् ११ प्रणीतेन प्रवर्त्तितेन जंतवो जंतुसदृशा अज्ञा अपि १२ पुरुषसिंहेन पुरुषश्रे
ष्ठेन विश्वामित्रेण ज्वलनेनेति ईशानिलये वह्निस्थितममृतं परितः प्राकारभूतेन रक्षितमिति प्रसिद्धं कृतास्त्रं शिक्षितास्त्रं शक्ष्यंति धर्ष
यितुमिति शेषः १३ उक्तार्थोपपत्तये विश्वामित्रप्रभावं प्रपंचयति एष इति परं श्रयणं स्थानं १४ सचराचरे प्रसिद्धमिति शेषः सच

नचरक्षांगनतवलीतस्मात्सर्वात्मापि ॥ ८॥

राम.
२१

अथ येत्पनुपत्यंते सुंदोपसुंदपुत्रौ मारीचसुबाहू २६ अदत्तमपि रामं च योवलान्नेतुमिच्छतीति चेत्तत्राहत्यैति ततर्हि उक्तवलेपि ते त्वयाक
र्तुमुखत्वविवत्तया सहैव वक्तारो राक्षसत्वाद्रक्षसा इत्यर्थः अन्यथा अमत्वात्तु शाश्वतं निश्चितं २७ असौकं दशरथः मुनेरभिमतेराम
प्रमाणेनात्मसवधे च संशयकर्त्तव्यमथवा न कर्त्तव्यं सेत्स्यत्यथ वा न सेत्स्यतीत्यादिरूपकर्त्तव्यमहो मिज्ञो ते निमग्न इव तत्क्षणं निश्चयमपि
नाज्ञासीत् यतः संप्राप्तौ चोजलधौ मज्जमानइवासीदिति शेषः २८ ॥ इति श्रीवासिष्ठतात्पर्य० वैराग्य० अष्टमः सर्गः ॥ ८ ॥ विश्वामित्रस्य को

सुंदोपसुंदयोश्चैव पुत्रौ वैवस्वतोपमौ यज्ञविघ्नकरौ तौ मे हि तेन ददामि पुत्रकं २८ अथ वैनौ यदि चेद्युद्धं लड्ढ्यो स्यहमेव जे अम
ध्यान्तु नपश्यामि शाश्वतं जयमात्मनः २७ इत्युक्त्वा मृदुवचनं रघुवंशोऽसौ कान्तो ले मुनिमतसंशयनिमग्नः नज्ञासीत्क्षणं म
पि निश्चयं स हात्मा प्राप्तौ वाविचजलधौ सम्भ्रममानः २८ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे वैराग्यप्रकरणे दशरथवाक्यं ना
अष्ट० तच्छ्रुत्वा वचनं तस्य स्नेहपर्याकुलेक्षणं समन्युः कौशिको वाक्यं प्रत्युवाच महीपतिं १ करिष्यामीति संश्रुत्य प्रतिज्ञां हा
तुमर्हसि सभवान्केसरी भूत्वा मृगतामिव वांछसि २ राघवाणामयुक्तोयं कुलस्यास्य विपर्ययः न कदाचन जायंते शीतां
शोरुष्णरश्मयः ३ यदि त्वं न क्षमो राजन् गमिष्यामि यथागतं हीनप्रतिज्ञ काकुत्स्थ सुखी भव सबान्धवः ४ ॥ वाल्मीकिरु
वाच ॥ तस्मिन्कोपपरीते तु विश्वामित्रे महात्मनि चचाल वसुधा कृत्स्ना सुरांश्च भयमाविशत् ५ श्रीरामचंद्राय नमः ॥

पौत्रत्तनयोस्तयोस्त्र वलोक्तिभिः वशिष्ठेन शनैरराज्ञः समाधानं च वर्ण्यते स्नेहेन पर्याकुले व्याकुले ईक्षणे नेत्रे यस्मिंस्तुल्यकालतयात
त्तथाभूतं वचनं श्रुत्वेत्यर्थः १ संश्रुत्य अंगीकृत्य सः प्रसिद्धः भवान् पूर्वः त्वमितिध्याहार्यं अन्यथा मध्यमपुरुषद्वयानुपपत्तेः २ राघवाणां
कुलस्य अयं विपर्ययो न तवाद्ध लक्षणः अयुक्तः तदेव व्यतिरेकन्यासेन समर्थयति नेति दृष्टान्तेन समर्थः ४ परिव्याप्ते महात्मनि तपोभ्रात्म
शालिनि पतितु परराधाद् पराधिधारणपराधात्मा मामेव धास्यतीति भयाद्वसुधाचचाल किमन्यमेव तपसा रावणादि हंतारं स्रक्ष्यति स

वसिष्ठोवाच

यस्यकालियाविक्षतीति मृगालम्भ्यमाने ब्रह्मत्यागे

३५

इति श्री वाशिष्ठ॰ ता॰ वैराग्य॰ नवमः सर्गः ॥ ९ ॥ तत्रादौ प्रहितोऽगत्वा याष्टीको रामचेष्टितं विज्ञाय पुनरागत्य राज्ञे कृत्स्नं न्यवेदयत् त
थेति उक्तफलप्रश्नसे प्रहर्षस्य पराकाष्ठा लब्धा कुतः परस्मै पदं हे तो ज्ञाता १ अविघ्नेन पुरुषार्थनिर्विघ्नगुणेनर्य त्रासिद्ध्यर्थं अथवा सत्यु वचन
परिपालनस्य महापुण्येन पूर्वोपस्थित मिथ्याशोकवशीकृतं वेना। त्यागि विश्रामा भूरि लो भिप्रत्येव मुक्ते शीघ्र पदेनाप्येतदेव यो ग्यतेन २ वि
स्रष्टः प्रेषितः अंतः पुरांतस्थं राममंदिरं ३ विमनाः विषण्णमनाः ४ सकल घटिकायाः षष्ठो भागः एकत इतिवक्तीत्यनेनापि संवध्यते उ
क्तिर्वी अत्रावेण नमनः पूर्वकं मुखं च नु ध्यायत्येवेति भावः ५ तत्प्रनीहारस्थं सह राम समा वा रनिवेदना यागत रामानुचरं जनं अनाश्वसा

इति वशिष्ठ समाश्वासनं नाम नवमः सर्गः ॥ ९ ॥ श्रीवाल्मीकिरुवाच ॥ तथा वशिष्ठे ब्रुवति राजा दशरथस्सुतं संप्रहृष्ट
मना राममाजुहाव सलक्ष्मणं १ ॥ दशरथ उवाच ॥ प्रतीहार महाबाहुं रामं सत्यपराक्रमं सलक्ष्मणमविघ्नेन पुण्यार्थं शीघ्र
मानय २ इति राज्ञा विसृष्टोऽसौ गत्वांतः पुरमंदिरं मुहूर्तमात्रेणागत्य तमुवाच महीपतिं ३ देवसर्वदलिताशेषरिपो रामः
स्वमंदिरे विमनाः संस्थितो रात्रौ षट्पदः कमले यथा ४ आगच्छामि क्षणेनेति वक्ति ध्यायति चैकतः न कस्यचिच्छृणोति क
स्यातुमिच्छति खिन्नधीः ५ इत्युक्तस्तेन भूपालस्तं रामानुचरं जनं सर्वमाश्वासयामास पप्रच्छ च यथाक्रमं ६ कथं कीदृ
ग्विधो राम इति पृष्टो महीभर्ता रामभृत्यजनः खिन्नो वाक्यमाह महीपतिं ७ देहयष्टिमिमां देव धारयंत इमे वयं खिन्नाः खे
दपरिम्लानतनौ रामे सुतेतव ८ रामो राजीवपत्राक्षो यतः प्रभृति चागतः सविप्रतीर्थयात्रायास्ततः प्रभृति दुर्मनाः ९ राम ॥ १०

न सम्यग्धि वेदयेयुरित्याश्वासयामास ६ एकः क्रियायाः प्रश्नः अपरः कार्श्यविषादाद्यवस्थानां ७ यष्टिमिव कृशां देहं यष्टिं खिन्नाः दुःखि
ताः तथा च वयं दृष्टिः मंच्यता इष्टो रेवदकार्श्येन तस्य ते किं वाच्यं इति भावः राजीवं कमलं यतो यस्मात् दिनात्प्रभृति आगतस्तिष्ठतीति पद
मध्याहार्यं अन्यथा आगमनस्य प्राप्य हिकत्वाभावेनाधिकरणानिरिक्तारंभकालानपेक्षत्वेन प्रथमस्य प्रभृतीति पदस्यैव वैयर्थ्या
त् यदा आगतस्ततः प्रभृते तावतैव सिद्धेः स्थितस्तु प्रा प्रहि कत्वाद्गमनस्य वदस्सेवाधिकरणकालानिरिक्तारंभाकालापेक्षति
॥ न तद्वैयर्थ्यमिति ९ ॥

नसदृशाः प्रभावेणेति शेषः नन्विदं कथं संगच्छतां भगवं गिरामस्य प्रभृतीनां महर्षीणां ब्रह्मादीनां देवानां च प्रत्येकमपि न्यूनप्र-
भावत्वानुपपन्नमिति चेदेवं नहि ननु दृशास्त्वन्नल भावमन्यथाभिमानिकं परिच्छिन्नभावमभ्युपेत्येदमुच्यत इत्यदोषः नच ब्रु-
भावत्वानुपपन्नमिति चेदेवं नहि तत्तु दृशास्त्वत्रल भावमन्यथाभिमानिकं परिच्छिन्नभावमभ्युपेत्येदमुच्यत इत्यदोषः नचब्र-
स्वभावनापि तेषामेव तत्सारूप्यं तत्र भेदाभावेन तेष्विति तस्य तस्ययोगात् तथाच श्रुतिः तस्य ह न देवाश्चनाभूत्या ईशत आत्मा ह्ये-
षां सभवतीति कृशाश्वतनितमिति शेषः दत्तं तपसा संतोषितेन रुद्रेणेति शेषः प्रसिद्धमिदं पूर्वरामायणे न्वेते अस्त्रदेवाः प्रजाप-
तिसुता रुद्रः तदुपमाः संहारवीरा विचक्षणाः -मोक्षः शत्रुतपसामर्थ्येन विश्वामित्रं तपः प्रभावेन वशीकृतत्वादन्वचरन् अनुच-
रवत्सेवंते भलकालेन विवक्षितः १८ तेषु प्रधाना नाहजयेत्यादिना दानाधिसंख्या दक्षकन्ये १९ तान्विभज्य दर्शयति पंचाशतमिति

नैव देवा न ऋषयः केचिन्नासुरा न च राक्षसाः नागा यक्षगंधर्वाः समेताः सदृशा मुनेः १६ अस्त्रमस्मै कृशाश्वेन परैः परमदु-
र्जयं कौशिकाय पुरा दत्तं यदा राज्यं समन्वगात् १७ ते हि पुत्राः कृशाश्वस्य प्रजापतिसुतोपमाः एनमन्वचरन्वीरा दी-
प्तिमन्तो महौजसः १८ जया च सुप्रभा चैव दक्षकन्ये सुमध्यमे तयोस्तु यान्यपत्यानि शतं परमदुर्जयं १९ पंचाशतं सु-
तांल्लेभे जया लब्धवरा पुरा वधार्थं सुरसैन्यानां तेऽमी कामचारिणः २० सुप्रभाजनयामास पुत्रान्पंचशतं परान् सं-
हारान्नाम दुर्द्धर्षान्दुराकारान्बलीयसः २१ एवंवीर्यो महातेजा विश्वामित्रो महामुनिः न राम गमने बुद्धिं विक्लवां कर्तुम-
र्हसि २२ अस्मिन्महासत्वे मुनींद्रे स्थिते समीपे पुरुषस्य साधोः आगेमिमृत्योर्गतत्वमेति मा दीनतां गच्छ यथा विमूढः २३

लब्धवरा पतिशुश्रूषयेति शेषः सुरसैन्यानामिति कर्त्री हि षष्ठी अतो योग्यतया असुरवध एव लभ्यते २० संपर्वान्परास्त्वभि-
भवनशीलत्वात्तत्स्वान् दुराकाशालीलाकारान् २१ गमनं सर्वमनुयोग वल्सास्त्यपतितन्वीलेनगन्मुनिः अत एवरा
मविजयमपि भाविनं हृदि समागत इति तद्बुद्धि फलं चाकुलमिति भावः २२ तदेव दृढयन्नाह अस्मिन्निति सत्वं प्रभावः पुरुष-
स्यासाधारणस्यापि अमरत्वमेति अर्थान्तपुरुषः तथाच साधारणपुरुषस्यापि तत्सन्निधानमात्रेण प्रियत्रशान्तादपि मृत्योर्न
भयं प्रत्युतामरत्वप्राप्तिस्तत्र महाप्रभावस्य रामस्य गमने इति किमु तुच्छेभ्यो राक्षसेभ्यो भयमन्येतमसं भाविता मिति मूढवत्का-

बालकां० २३

वा॰टी॰ अलकेषु वक्त्रेषु यैः ध्यसत्वादिभिः अंजये विलोला यासां ताः हेला शृंगारभावजा क्रिया सा भंगी पदे अलकाइव पुष्पमंजर्यः हेलये चलितलो
वै॰प्र॰ चनाश्चपलेक्षणाः २० पिचिनि स्वरस्थेषु जंतुषु जंतुसदृशेषु यामेरषु देवादिक्रीनो मनुष्यो यथा एकांतादिष्वेव रजिवं भाति तद्वत् ता
२३ पप्रसिद्धया परिव्राजां ये धर्मा अपरिग्रहादयस्तद्वंतं परिव्राजमेव अनुयाति अनुकरोति २१ एकया मुख्यया २२ तर्हि तत्र किं करो

विलोलालकवक्त्रेयैर्हेलावलितलोचनाः नारदृश्यंतितं नार्यो मत्तो वनतरू यथा २० एकांतेषु दिगंतेषु तीरेषु विपिनेषु च
23 रतिमाप्नोत्यरण्येषु विक्रीत इव जंतुषु २१ वस्त्रपानाशनादानपराङ्मुखतया तया परिव्राट् धर्मिणं रूपसोनुयाति तप
स्विनं २२ एक एव सदेशजनशून्येजनेश्वरः न हसत्येकथा बुद्धा न गायति न रोदिति २३ बद्धपद्मासनः शून्यमना वाम
करस्थले कपोलतलमाधाय केवलं परितिष्ठति २४ नाभिमानमुपादत्ते न च वांछति राजतां नोदेति नास्तमायाति सुख
दुःखानुवृत्तिषु २५ न विद्मः किमसौ याति किं करोति किमीहते किं ध्यायति किमायाति कथं किमनुधावति २६ प्रत्यहं
कृशतामेति प्रत्यहं याति पांडुतां विरामं प्रत्यहं याति शरदंत इव द्रुमः २७ अनुयातौ तथैवैतौ राजं शत्रुघ्नलक्ष्मणौ ता॥
॥ दृशावेव तस्यैव प्रतिबिंबाविवास्थितौ २८॥

रोति तत्राह बद्धेति शून्यं परमार्थालंबेन मनो यस्य सः परितिष्ठति ध्यायन् इत्यर्थो लभ्यते २४ उत्थानमयावत्प्रसादविवादेषु सुखदुः
खानुवृत्तिषु विषादानिष्टसंयोगेषु २५ ईहते इच्छति अनुधावति अनुसरति २६ विरामं वैराग्यं द्रुमपक्षे वैवर्ण्यं कृशतामिति यावत् राम॰
अनुयातौ स्नेहादनुसृतौ अर्थात् रामं इति गम्यते तादृशावेव यादृशो रामः २८॥ श्रीरामचंद्राय नमः॥ ॥ ॥ ॥ ॥ ॥ २३

आन्हिकानिजव्यापारंभोजनादि नकरोतिवेत्यनास्थाद्योतनाय २० देवार्चनाचदानंचेतिवार्चनंच आदानंचितिवावियह: २१ नाम

रीभि: सहेलिशोभ्य: दोलाप्रेंखोलिका अंगणेक्रीडग्वल्वेर यथावर्षधाराभि: सहता उपभुंजानश्चानक: क्रीडतितथानक्रीडतिचेत्य

न्वय: मुकुलाकारैर्मौक्तिकै: प्रोतारचिताश्च: सर्वो: पानविष्वयमासन्नपतनं स्वर्णिरण २३ क्रीडंतीभिर्वधूभिर्विलोकात इतिवाक्री

डंतीनां विविधलोकचानिलोकापजेतिवापदंभेद क्रीडद्वधूनांविलोकारवंघनावाण्यस्तद्ववहत: कुसुमवायवोयंत्रेत्येकपदंवि

यत्र प्रार्थनयास्माकं निजव्यापारमान्हिकं। सम्यमाम्लानवदन: करोतिनकरोतिवा २० स्नानेदेवार्चनादानभोजनादिषु दुर्म

ना: प्रार्थितोपिहि नान्तरभ्रास्यपानमीश्वर: २१ लोलंतान: पुरनारीभि: कृतदोलाभिरंगणे नचक्रीडतिलीलाभिर्धाराभिरि

वचानक: २२ मौक्तिकचकुमुकुलप्रोताकेयूरस्रुकदावलि: नानंदयतिनं राजन्नु शु: पातविषये यथा २३ क्रीडद्वधूविलोकेषु

वहत्कुसुमवायुषु लतावलयगेहेषु भवनानिविषादवान् २४ यदुक्तमुचितंस्वादुपेशलंचित्तहारिच वाक्यपूर्णं तएव तेन

वधारयिवदते २५ किंभिमादु:खदायिन्य: प्रस्फुरंतीपुरांगना: इतिनत्रविलासेषु कामिनी: परिनिंदति २६ भोजनंशयनं

यानं विलासंस्नानमासनं उन्मनश्चेहितस्त्वनाभिनंदत्यनिंदितं २७ किंसंपदा किंविपदा किंगेहेन किमिंगितै: सर्वमेवा

॥ ॥ सदितुस्कान्तस्नुमेवाचतिकृते २८ ॥ जोपितेपरिहासेषुनभोगेषुनिमज्जतिनचरति

ग्रह: लतानांवलयनंवेष्टनंवलयस्तत्संबंधिषुगेहेषुकुंजेष्वित्यर्थ: २४ उचितंउभयोर्लोकशास्त्राविरुद्धं पेशलं चतुरं चित्तहारिमनो

हरं २५ प्रस्फुरंती: हावभावलावण्यविलासादिभि: शोभमाना नत्वांनीर्वा इत्यांकिंयत्नेदु: खदायिन्यइति निंदतीतियोजना प्रस्फुरंतीति

याध्याहार्त: २६ शयनं आसनमित्यधिकरणेल्युट: विलसंतियेनयस्मिन्वातं अनिंदितं निर्दोषंइदसर्वविशेषणं २७

इंगितैर्मनोरथै: असत्‌आसारं २८ उदंतिहस्यतिनिमज्जतिमज्जनकार्यंसारंभेपुनातिकृत्वास्थानं करोति २९ श्रीरामचंद्रायनम: ॥ ॥

वा॰टी॰ नभेदयंतिनभिंदंतिप्रेमसलाधारोयास्मिन् धाराजलधारा: ३६ आवासंनिवासस्थानंअर्थिनेयाचकाय ३७ कल्पनामय: कल्पना
वै॰प्र॰ प्रचुर:मोहोभ्रम: ३८ आक्रंदपर: इष्टवियोगादितिशेष: तयान्वयव्यतिरेकाभ्यांरागदु:खपश्यन्नपीतिभाव: ३९ रघुपदेनर
२५ घुवंशोलसनेशालोवृक्षविशेष: प्रसिद्ध: एवकारोहेत्वंतरव्यावृत्तये ४० कि कुर्म:श्लोकोमनयार्थमितिशेष: ४१ ननुनीतिज्ञ:
संव्यवहारोपदेशोनास्यमोहापनीयतांतत्राहराजानमितिउपदेशमंराजनीतिव्यवहारानितिशेष: अवधीरयतिअनभिनंदते

कांतामध्यगतस्यापिमनोस्यमदनेनबव: नभेदयंतिदुर्भेद्यंधाराइवमहोपलं ३६ आयदामेकमावासमभिवांछतिकिंधनं अनु
शिष्टेतिसर्वस्वमर्थिनेसंप्रयच्छति ३७ यस्मायदिंप्रसंपदित्येवंकल्पनामय: मनसाभ्युदितोमोहइतिश्लोकानुगायति ३८
हाहतोहमनाथोहमित्याक्रंदपरोपिसन् नजनोयातिवैराग्यंचित्रमित्येवतत्परो ३९ रघुकाननशालेनरामेणरिपुघा
तिनाभयामित्थंस्थितेनैवबसंखेदमुपागता: ४० नविद्म:किंमहाबाहोतस्यतादृग्विचेतस: कुर्मकमलपत्राक्षगति
रत्रहिनोभवान् ४१ राजानमथवाविप्रमुपदेशमयत: हसत्यज्ञमिवाव्यग्र:सोवधीरयतिप्रभो ४२ यदेवदमिदस्फा
रंजगन्नामयदुत्थितं नैतद्वस्तुनवैवाहमितिनिर्णीयसंस्थित: ४३ नारीनात्मनिनोमित्रेनराज्येनचमातरि नसंपदान
विदांतेस्यास्थानविभोवहि ४४ निरस्तास्थानिराशोसोनिरीहोसोनिरास्पद: नमूढोनचमुक्तोसौतेनतप्यामहेभृशं ४५
*

नतिरस्करोतीव ४२ यातीतियत् गत्वंरनश्वरमेवेत्यर्थ: इदमिवंबहुविधंवाहिइंद्रियगम्यंस्फारंविस्तीर्णं वसतीतिवस्तुसदेकरूपंअहम्
मितिबुद्धिगम्यंचनैववस्तुकिंतुमायाइत्यमेवेतिनिर्णीयतत्त्वजिज्ञासु: संस्थित: विषयेपंचसम्य: विषयस्यैवहेतुत्वविवक्षयाइत्तृतीये
वहि: शब्देनसामान्योक्तस्येवपूर्व:प्रपंच: ४४ स्वपराधीनविषयत्वाभ्यामास्थाशार्योभेद: विशेषाभवादेवनिरीहोनिरिच्छ:वाह्य
विषयेचेदं तर्हिदु:खहेत्वभावात्कुतोसौदु:खीतत्राहनिरास्पइतियनोपमलक्ष्यात्मविश्रांतिरित्यर्थ: नमूढोविवेकत्वात् नचमुक्तो

विश्रामस्थापनाय ४५

नकिंचिदित्युक्तेसति: पविहंतुं शक्यं किंचिन्नास्तीत्रिरामाशाय: निरीहित: स्वाभिप्रायव्यंजकचेष्टाशून्य: २९ आपातमात्रेति
